# टिळक महाराष्ट्र विद्यापीठ, पुणे

**23E**

**संस्कृत विशारद (बी.ए.) – बहिःस्थ**

**परीक्षा : मे – २०२४**

**सत्र २ रे**

**विषयः भीमायन (23E424)**

दिनांक :२८/०५/२०२४ | **गुण : ५०** | **वेळ : स. १०.०० ते दु. १२.००**

**सूचना : सर्व प्रश्न अनिवार्य**

**प्र. १. केषाञ्चित् चतुर्णां श्लोकानामनुवादं माध्यमभाषया कुरुत।** **(१६)**

१) आचार्य आम्बेडकरोपनामा गुणानुरागी च दयार्द्रचित्तः।
अध्यापने यद्यपि नातिरक्तश्छात्रप्रियोऽभूत्स मृदुस्वभावात्।।

२) अनन्यसामान्यपितृत्वमेतत्केनापि कुत्रापि न दृष्टपूर्वम्।
तद्ग्रन्थसंपत्तिवटस्य मूलान्येवं प्ररूढानि हि बाल्यभूमौ।।

३) अकिञ्चनत्वात्खलु चास्य तात इतःपरं पाठयितुं न शक्तः।
श्रीमत्प्रसादेन शमं प्रयातु ज्ञानामृतस्यास्य तृषा निरन्ता।।

४) क्रीडाविभागस्य स एव नेता विपक्षसंघान् स पराबभूव।
कुशाग्रबुद्धावपि तस्य सत्यां श्रेणीं स उच्चां न कदापि लेभे।।

५) गत्वा वडोद्रानृपतिं च भीमः कृतज्ञतां स्वां प्रकटीचकार।
यन्मे यशस्तद्भवदीयमेव श्रीमत्पदोस्तद्धि समर्पयामि।।

६) तत्काल आसीन्प्रथमं समीकं भयानकं विश्वविनाशकारि।
तद्ग्रन्थभारं च समुद्वहन्ती नौः खण्डिता क्षेपणकैश्च शत्रोः।।

**प्र.२. रूपपरिचयं लिखत।(केवलं पञ्च)** **(५)**

१. वरेण्यः। २. विश्वविनाशकारि। ३. पपाठ।
४. ग्रन्थालये। ५. दयालुः। ६. वराकी।
७. कार्यवशात्।

**प्र.३. सन्धीन् घटयत विघटयत वा। (केवलं पञ्च ।)** **(५)**

१. आश्वासयंस्ताम्। २. चावगणय्य। ३. सुखेन+एव।
४. हस्तान्निशायाम्। ५. चिन्तया+अलम्। ६. मूलानि+एवम्।
७. गुरुर्बभाषे।

**प्र.४. ससन्दर्भं स्पष्टीकरणं कुरुत। (केवलं त्रीणि।)** **(१२)**

१. नामान्तरं चैतदभूदपूर्वं ध्रुवं नु जन्मान्तरभावबन्धात्।
२. दृष्ट्वैव भावं प्रकटीचकार।
३. आधारहीनं हि मम गृहं स्यात्।
४. तदीयचित्तेऽपि घनान्धकारे प्रज्वाल्यतां ज्ञानमयः प्रदीपः।
५. स्वप्नस्तु भीमस्य मरीचिकेव दृष्टोऽपि दूरं प्रपलायतैव।

**प्र.४. टिप्पणीः लिखत।(५तः३)** **(१२)**

१. आचार्याणां भीमशिक्षणे योगदानम्।
२. भीमशिक्षणे सयाजीराजस्य साहाय्यम्।
३. भीमशिक्षणे रामजीमहोदयस्य योगदानम्।
४. भीमस्य परिश्रमाः।
५. भीमस्य महाविद्यालयगतं जीवनम्।

----------